दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-323 | 1 | सितम्बर 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लप्रतिपदा
भाद्रपद 27 प्रविष्टांशः मङ्गलमयः भवेत्

2 अमरीका-देशे नव-एकादश आक्रमणस्य पञ्चविंशतिवर्षपूर्तौ आतङ्कवादं विरुध्य युद्धाय भारतेन दृढनिश्चयो विहितोऽस्ति

4 शारीरिक-शिक्षा-शिक्षकाणां पृष्ठ-शेषपदानां (बैकलॉग) 'जॉब-ट्रेनी' माध्यमेन पूरणे प्रतिबन्धः, उच्चन्यायालयेन सर्वकारात् उत्तरं याचितम्

8 भाद्रमासस्य अमावस्या तिथिः 'कौशिकी अमावस्या'








# ब्रिक्स-शिखरसम्मेलनम् - नवदेहल्यां विश्वनेतृभिः सम्मिलितं ब्रिक्स्-शिखरसम्मेलनं वैश्विक-कल्याणस्य आकांक्षया सह सकारात्मक चर्चायाः आधारो भविष्यति- प्रधानमन्त्री

हिमसंस्कृतवार्ता। नवदेहली-नगरस्य भारतमण्डपे अष्टादशं ब्रिक्स्-शिखरसम्मेलनम् भविष्यति, एतदर्थं मञ्चः सज्जः अस्ति। शिखरसम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदिना रूसदेशस्य राष्ट्रपतये व्लादिमिर् पुतिनाय, चीनदेशस्य राष्ट्रपतये षी. चिन्फिङ्ग् इत्यस्मै दक्षिण-अफ्रिकादेशस्य राष्ट्रपतये सिरिल रामाफोसाय, मिस्र-देशस्य राष्ट्रपतये अब्दुल फत्ताह अस्सीसी इत्यस्मै इण्डोनेशिया-देशस्य राष्ट्रपतये प्राबोवो सुबियान्तो वर्याय, ईरान्-देशस्य राष्ट्रपतये मसूद् पेजेश्कियन्, अबुधाबी-देशस्य युवराजाय शेख-खालिद्-बिन्-मोहम्मद्-बिन्-जायद्-अल्-नह्यान् इत्यादिभ्यः विश्वनेतृभ्यः आतिथ्यं दीयते। भारतस्य अध्यक्षपदीयस्य षड्विंशोत्तरद्विसहस्र-तमवर्षस्य विषयः 'सुदृढतायै, नवाचाराय, सहकाराय, सततविकासाय च निर्माणम्' इति अस्ति। "समावेशि-वैश्विक शासनम् अथ बहुपक्षवादस्य सुदृढीकरणम्" इति विषये ब्रिक्स सदस्यराष्ट्राणां कृते समापनसम्मेल्लनस्य माध्यमेन शिखरसम्मेलनं अद्य आरप्स्यते। ब्रिक्स् सदस्यराष्ट्राणां नेतारः भारतमण्डपम् इत्यत्र भारत-नवान्वेषण-प्रदर्शनं द्रष्टुं शक्नुवन्ति। ते संयुक्त-वृक्ष-रोपणम् अपि करिष्यन्ति, यस्यानन्तरं प्रधानमन्त्रिणा मोदीवर्येण गाला-डिनराख्यं संयुक्तभोजं आयोजिष्यते। शिखरसम्मेलने प्रधानमन्त्रिणा ब्रिक्स् नेतृभिः सह अनेकानि द्वैपाक्षिकसम्मेलनानि आचरिष्यन्ते। नवदेहल्यां सम्पूर्णविश्वस्य नैकाः नेतारः समागच्छन्ति । अष्टादशे ब्रिक्स्-शिखरसम्मेलने भागं ग्रहीतुं नवदेहल्यां सम्पूर्णविश्वस्य नैकाः नेतारः समागच्छन्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। सामाजिक-माध्यम-प्रसारे श्रीमोदी विश्वासम् प्रकटितवान् यत् अस्मिन् सम्मेलने विविधविषयेषु सकारात्मिका अर्थपूर्णा च चर्चा भविष्यतीति, यस्य मार्गदर्शकः उद्देश्यमस्ति विश्वस्य कल्याणमिति। भारतमण्डपम् इत्यत्र भविष्यति द्विदिवसात्मकं शिखरसम्मेलनं ब्राज़ील, चीन, मिस्र, इथियोपिया, इण्डोनेशिया, भारतम्, ईरान्, रूस, सऊदी अरब, दक्षिण अफ्रीका, यू. ए. ई. इत्यादीनि एकादशानि प्रमुखाणि उदयोन्मुखानि विकासशीलानि च अर्थव्यवस्थायुतानि राष्ट्राणि च एकत्रितानि भवन्ति ।

## रशियन-सङ्घस्य उपप्रधानमन्त्रिणः डेनिस् मन्टुरोव्-वर्यस्य आगमनम् अभवत्

ब्रिक्स्-शिखरसम्मेलनस्य 2026 इत्यस्मात् प्राक् नवदेहल्यां रशियन-सङ्घस्य उपप्रधानमन्त्रिणः डेनिस् मन्टुरोव्-वर्यस्य आगमनम् अभवत् । केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनश्च प्रथमवारं तेन सह मिलितवती। उभययोर्देशयोः मध्ये आर्थिकसहयोग-सुदृढीकरणीय मार्गाणां विषये अपि चर्चा जाता।

# अद्यतनीयं सुभाषितम्

**आत्मना संग्रहीतेन शत्रुणा शत्रुमुद्धरेत्।**
**पदलग्नं करस्थेन कण्टकेनैव कण्टकम्।।**

भावार्थः- अपने शत्रुओं से मुक्ति पाने के लिए अपने शत्रुओं का ही उपयोग उसी प्रकार करना चाहिए जैसा कि पांव में चुभे हुए एक कांटे को निकालने के लिए एक अन्य कांटे को हाथ में पकड़ कर उसकी सहायता से कांटा निकाला जाता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## प्रधानमन्त्री मोदी रूसदेशस्य राष्ट्रपतिना व्लादिमिर् पुतिन् इत्यनेन सह द्वैपाक्षिकं वार्तालापं कृतवान्, परस्पर-हितस्य विविधविषयेषु चर्चाञ्च सञ्जाता

प्रधानमन्त्री नरेन्द्रमोदी रूसदेशस्य राष्ट्रपतिः व्लादिमीर पुतिन इत्येतौ नवदेहल्यां भारत-मण्डपम इत्यत्र द्विपक्षीय-मन्त्रणां कृतवन्तौ। उभावपि नेतारौ परस्पर-हित-सम्बद्धेषु विस्तरेण विचार-विमर्शम् अकुरुताम् । मेलनेऽस्मिन् श्रीमोदिना प्राचीन-तमिळ-दार्शनिक-कवेः तिरुवळ्ळुवरस्य तिरुक्कुरल इत्याख्यस्य ग्रन्थस्य रूसी भाषानुवादः राष्ट्रपतये पुतिन- महोदयाय उपहारत्वेन समर्पितः। प्रधानमन्त्री मोदी राष्ट्रपतिः पुतिनः च भारत-मण्डपम इत्यत्र आयोजितां इनोप्रॉम प्रदर्शनीम् अवलोकयताम्। राष्ट्रपतिः पुतिनः ब्रिक्स-शिखर सम्मेलने भागं ग्रहीतुम् गतदिवसे प्रातःकाले एव राष्ट्रिय-राजधानीं प्राप्तवान्। प्रधानमन्त्री मोदी सायङ्काले ईरान-देशस्य राष्ट्रपतिना मसूद-पेजेश्कियन इत्यमुना सहापि द्विपक्षीय वार्ता कृतवान्। पश्चिम एशिया-क्षेत्रस्य वर्तमानां स्थितिं संवीक्ष्य इयं मन्त्रणा अतीव महत्त्वपूर्णा मन्यते। इतोऽपि, स्वकीय-व्यस्त-दिनचर्यायाः अङ्गत्वेन प्रधानमन्त्री मोदी संयुक्त राष्ट्र-सङ्घस्य महा-सचिवेन अंतोनियो इतरश महोदयेन सहापि मेलनमकरोत् ।



## विदेश-कार्यमन्त्री डॉ. एस्. जयशङ्करः, ब्रिक्स्-संस्थायाः विंशतिवर्षाणि पूर्तौ वर्धमान-वैश्विक-अनिश्चिततायाः मध्ये सुदृढ सततविकास-सहकारस्य च आह्वानम् अकरोत्

षड्विंशत्यधिक-द्विसहस्रतमस्य ब्रिक्स्-व्यापार-मञ्चः नवदेहल्याः भारत-मण्डपम् इत्यत्र समारब्धः। अस्मिन् आयोजने सदस्य-राष्ट्रेभ्यः सहस्राधिकाः निगमाकारिणः, वाणिज्य-मन्त्रिणः, वित्तीय-नेतारः, वैश्विक निवेशकाः, औद्योगिकाभिनव प्रवर्तकाश्च एकत्रिताः भवन्ति। सम्बोधयन् विदेशमन्त्री डॉ. एस. जयशङ्करः निरुपितवान् यत् ब्रिक्स-सङ्घटनस्य विंशति-वर्षपूर्तौ वर्धमानायाः वैश्विक अनिश्चिततायाः मध्ये अधिक दृढतायै, सततविकासाय, सहकाराय च दृढसङ्कल्पः आवश्यकः। सः अवोचत् यत् गभीर-सहकारेण दृढतर-सहभागितया च सततविकासस्य संवर्धनं काम्यम्, अत एव सुदृढता प्रत्येकस्य राष्ट्रस्य आर्थिक रणनीतेः केन्द्रबिन्दुभूता सञ्जाता। अपरत्र, मञ्चस्य उद्घाटन सत्रं सम्बोधयता वाणिज्योद्योग-मन्त्रिणा पीयूष गोयलेन ब्रिक्स-देशेभ्यः आह्वानं कृतं यत् स्वकीयम् आर्थिक-सामर्थ्यं जनानां कृते उद्योग-अवसरेषु सम्पत्तौ, समृद्धौ च परिणमयितुं तैः परस्परं मिलित्वा कार्यं करणीयम्।




## विदेशमन्त्रालयेन सह समन्वयेन शिक्षामन्त्रालयेन भारत-नवान्वेषण-प्रदर्शनस्य आयोजनं क्रियते

विदेशमन्त्रालयेन सह समन्वयेन शिक्षामन्त्रालयेन नवदेहली-नगरस्य भारतमण्डपे द्विवार्षिकस्य भारत-नवान्वेषण-प्रदर्शनस्य आयोजनं क्रियते, यत्र अष्टादशं ब्रिक्स्-शिखरसम्मेलनं 2026 अपि च तदनुगुणं भारतस्य डीप्-टेक् इति नवान्वेषणानि प्रदर्श्यन्ते। अस्यां प्रदर्शन्यां भारतस्य सप्तत्रिंशत् डीप्-टेक् स्टार्ट-अप्-संस्थाः, उद्यमाश्च प्रदर्शिताः सन्ति, ये भारतस्य ब्रिक्स्-अध्यक्षपदस्य स्थितिस्थापकतायाः, नवान्वेषणस्य, सहकारस्य, सुस्थिरतायाः च विषयवस्तुभिः सह संयुज्यन्ते।

## अमरीका-देशे नव-एकादश आक्रमणस्य पञ्चविंशतिवर्षपूर्तौ आतङ्कवादं विरुध्य युद्धाय भारतेन दृढनिश्चयो विहितोऽस्ति



संयुक्तराज्य अमेरिकायां सञ्जातस्य भीषणस्य नव-एकादश इत्याख्यस्य आतङ्कवादि-प्रहारस्य पञ्चविंशतितमे स्मृति-दिवसे भारतेन आतङ्कवाद-निर्मूलनाय स्वकीयः दृढसंकल्पः पुनरपि निरुपितः। प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् यद्यपि आतङ्कवादस्य स्वरूपं नैरन्तर्येण परिवर्तते तथापि सर्व-प्रकारकस्य आतङ्कवादस्य विरोधं कर्तुं भारतस्य सङ्कल्पः सर्वथा निष्कम्पः दृढश्च वर्तते। एतस्य घोर-प्रहारस्य पञ्चविंशतितमे वार्षिकोत्सवे सामाजिक सञ्चारपटलीय-सन्देशे श्रीमोदी निरुपितवान् यत् आतङ्कवादेन जगति असंख्यानां निरपराधिनां जीवनं विनाशितम्। सः प्रत्यपादयत् यत् भारतं विगत-दशकेभ्यः आतङ्कवाद-विरोधि-संग्रामे अग्रिम-पङ्क्तौ संस्थितम् अस्ति। प्रधानमन्त्रिणा अस्मिन् घोर-प्रहारे मृतेभ्यः अश्रुपूर्णा श्रद्धाञ्जलिः समर्पितः अथ च तेषां शोकसन्तप्त-परिवाराणां कृते ऐक्यभावः प्रकटितः।

## बिहार-राज्ये जलप्लावनस्य स्थितिः अद्यापि सङ्कटकरा एव अस्ति

बिहार्-राज्ये जलप्लावनस्य स्थितिः अद्यापि सङ्कटकरा एव अस्ति। राज्य-विपद् व्यवस्थापन-विभागानुसारं चतुर्दश-मण्डलेषु पञ्चाशीतिषु खण्डेषु चतुश्चत्वारिंशत् लक्षतोऽधिकाः जनाः प्रभाविताः सन्ति। प्रभावितेषु मण्डलेषु साहाय्यकार्याणि प्रचलन्ति। जलसंसाधनविभागानुसारं, गतचतुर्विंशतिषु होराषु प्रमुखनदीषु जलस्तरः न्यूनः अभवदिति। परन्तु, अष्टनद्यः अद्यापि सङ्कट-चिह्नात् उपर्येव प्रवहन्त्यः सन्ति।

## छत्तीसगढ राज्ये, तटीय-आन्ध्र-प्रदेशे, ओडिशा-राज्ये च प्रचण्डतोऽति-प्रचण्डवृष्ट्यै नारङ्गवर्णीया सञ्चेतना

भारतस्य ऋतुविज्ञान-विभागेन छत्तीसगढ राज्ये, तटीय-आन्ध्र-प्रदेशे, ओडिशा-राज्ये च प्रचण्डतोऽति-प्रचण्डवृष्ट्यै नारङ्गवर्णीया सञ्चेतना दत्ता अस्ति। अरुणाचलप्रदेशः, असम, मेघालय, झारखण्ड, केरलम्, माहे, मध्यप्रदेश, तेलङ्गाना, उत्तराखण्ड, विदर्भ, पश्चिमबङ्ग, सिक्किम, गुजरात इत्येतेषु प्रदेशेष्वपि अग्रिमाणि दिनानि यावत् प्रचण्डवृष्टिः भवितुम् अर्हति। एतदतिरिच्य दिल्ली-नगरे आगामीनि द्वि-त्रि दिनानि यावत् आकाशः मेघावृतः स्थास्यति अति-लघु-वर्षापि भवितुम् अर्हति।

## क्रीडावार्ता- हॉकी-क्रीडायां भारतं मलेशिया-देशं त्रि-एकम् अंकैः पराजित्य चीनदेशस्य मोक्वी-नगरे पुरुष-कनिष्ठ-एशिया-कप् इत्यस्मिन् अन्तिम-स्पर्धायां स्थानं प्राप्नोत्




कनिष्ठ-एशिया-चषक-हाकी-क्रीडायां भारतीय-कनिष्ठ-पुरुष-दलं प्रथमायां उपान्त्यस्पर्धायां मलेशिया-देशम् एकस्योत्तरे त्रिभिः अंकैः पराजित्य चीनदेशस्य मोक्वी-नगरे अन्तिमस्पर्धायां स्थानं प्राप्तवत्। भारतस्य नायकः अन्मोलू एक्का इत्येषः द्विवारं गोल् इति लक्ष्यप्रापणं कृतवान्, सुख्वीन्दरः गोलैकं कृतवान्। अत्रान्तरे भारतीय-कनिष्ठ-महिला-दलम् अद्य उपान्त्यस्पर्धायां दक्षिणकोरिया-देशेन सह योत्स्यते।

## एलेना रिबाकिना इत्येषा न्यूयार्क-नगरे द्वितीयोपान्त-चक्रीयायां क्रीडायां तृतीय-ग्रैण्ड्-स्लैम्-उपाधिं प्राप्तुम् उद्यतवती



यू. एस्. ओपन्-टेनिस् इति क्रीडायां द्वितीय-सीड् एलेना रिबाकिना इत्येषा न्यूयार्क-नगरे द्वितीयोपान्तचक्रीयायां क्रीडायां चतुर्थ-सीड् इति कोको गाफ़् इत्येनां पराजित्य, पूर्वविजेत्रीं आर्यना सबालेन्का इत्यनया सह महिलैकलेति उपाधिं प्राप्तवती तथा च तृतीय-ग्रैण्ड्-स्लैम्-उपाधिं प्राप्तुम् उद्यतवती। प्रथमायां उपान्त्यचक्रीय-क्रीडायां बेलारुस्-देशस्य शीर्षस्थानधारिका सबालेन्का इत्येषा अमेरिकीयायाः जेसिका पेगुला इत्येतां विरुध्य सप्त-पञ्च, षड्-द्वि इत्यङ्कैः विजयं प्राप्य अन्तिम-स्पर्धायां स्थानं प्राप्तवती।

# ब्रिक्स-वाणिज्यमञ्चे वैश्विक-अर्थव्यवस्थायाः आर्थिकसन्तुलनस्य च चर्चा



**नवदेहली/भागलपुर हिमसंस्कृतवार्ताः- डॉ विमलेश झा ।** ब्रिक्ससम्मेलनस्य वाणिज्यमञ्चे भारतस्य प्रधानमन्त्री नरेन्द्रमोदी, रूसदेशस्य राष्ट्रपतिः व्लादिमीरपुतिनः तथा अन्ये ब्रिक्सनेतारः वैश्विकव्यापारविषये महत्त्वपूर्णं सम्भाषणम् अकुर्वन्। रूस-राष्ट्रपतिना व्लादिमीरपुतिनेन प्रतिपादितं यत् पाश्चात्यदेशाः अधुना दुर्बलाः भवन्ति, क्रयशक्तिसामर्थ्यानुसारेण वैश्विक-अर्थव्यवस्थायां यत्र ब्रिक्सदेशानां सहभागित्वं प्रायः ४०% वर्तते, तत्रैव तु 'G7' समूहात् केवलं २९% भागः अस्ति।
प्रधानमन्त्रिणः मोदिना स्पष्टीकृतं यत् ब्रिक्सदेशेषु विश्वस्य अर्धजनसंख्या निवसति तथा च एते देशाः ४०% जीडीपीभागं धारयन्ति। व्यापारविस्ताराय सुरक्षिताः सामुद्रिकमार्गाः अनिवार्याः सन्ति। सङ्घर्षाणां समाधानं केवलं सम्भाषणेन कूटनीत्या च सम्भवति। ईरानस्य राष्ट्रपतिना पजशकियानेन स्थानीयमुद्राणां प्रयोगस्य बलं दत्तम्। दक्षिण-अफ्रिकादेशस्य राष्ट्रपतिना रामाफोसामहोदयेन अफ्रिकादेशेषु निवेशस्य आवश्यकता प्रतिपादिता। प्रधानमन्त्री मोदी तथा राष्ट्रपतिः पुतिनः मध्यपूर्वस्य कृष्णसागरस्य च स्थितिं संलक्ष्य ४५ निमेषाणि यावत् मन्त्रणाम् अकुरुताम्। राष्ट्रपतिना पुतिनेन चतुर्विंशतितमभारत-रूस-शिखरसम्मेलनाय मोदिनः रूस-आगमनार्थं निमन्त्रणं दत्तं, यत् प्रधानमन्त्रिणा स्वीकृतम्।




## ग्रहीतुं नवदेहलीं सम्प्राप्ता एनडीबी-अध्यक्षा डिल्मा-रॉसेफ-वर्या

नवविकासबैङ्कस्य (न्यू डेवलप्मेण्ट बैङ्क) अध्यक्षा डिल्मा-रॉसेफ अष्टादशे ब्रिक्स-शिखरसम्मेलने भागं ग्रहीतुं नवदेहलीं सम्प्राप्ता। विदेशमन्त्रालयेन सामाजिकमाध्यमस्य सन्देशे उक्तं यत् एषा यात्रा 'ग्लोबल साउथ'-क्षेत्रे विकाससहभागितां सुदृढीकर्तुं तथा सतत-समावेशिविकासयोः महत्त्वं रेखाङ्कितं करोति।

# केन्द्रीयमन्त्री पीयूषगोयलः 'माइक्रोसॉफ्ट-इण्डिया' इत्यस्य अध्यक्षेण पुनीतचण्डोकेन सह वार्ताम् अकरोत्

वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अद्य नवदेहल्यां 'माइक्रोसॉफ्ट-इण्डिया तथा दक्षिण-एशिया' इत्यस्य अध्यक्षेण पुनीतचण्डोकेन सह मेलनम् अकरोत्। सामाजिक-माध्यमस्य सन्देशे श्रीगोयलः न्यवेदयत् यत् अस्यां मन्त्रणायां दत्तांशकेन्द्राणां (डेटा सेण्टर्स्) क्षमतावर्धनं तथा भारतं कृत्रिमबुद्धेः (आर्टिफिशियल्-इण्टेलिजेन्स्) क्षेत्रे विश्वसनीयं वैश्विक-सहयोगिनं विधातुं 'इण्डिया एआई मिशन्' इत्यस्य अग्रेसरणविषये विचारविमर्शः अभवत्।



सः अकथयत् यत् भारतं वैश्विक-प्रौद्योगिकी-निवेशाय प्राथम्यप्राप्त-गन्तव्यस्थलरूपेण उदीयमानम् अस्ति।

# अरुणाचलप्रदेशस्य विवेकानन्द-केन्द्र-विद्यालयेषु आचरितः 'विश्वबन्धुत्वदिवसः'



अरुणाचलप्रदेशे विविधेषु विवेकानन्द-केन्द्र-विद्यालयेषु 'विश्वबन्धुत्वदिवसः' आचरितः। अयं दिवसः शिकागो-नगरे विश्वधर्मसंसदि स्वामिविवेकानन्दस्य ऐतिहासिकसम्बोधनस्य स्मृतौ आयोजितः अभवत्। राज्यस्य विविधेषु विवेकानन्द-केन्द्र-विद्यालयेषु सोत्साहं कार्यक्रमाः आयोजिताः। अस्मिन् अवसरे विद्यार्थिनः स्वामिविवेकानन्दस्य सार्वभौमिकबन्धुत्वस्य, सेवायाः, चरित्रनिर्माणस्य तथा राष्ट्रनिर्माणे समर्पितसहभागितायाः सन्देशं संस्मृतवन्तः।

# नागालैण्डस्य मुख्यमन्त्री नेफ्यू-रियो उपमुख्यमन्त्री यानथुङ्गो-पैटनः च गृहमन्त्रिणा अमितशाहेन सह मेलनम् अकुरुताम्

नागालैण्डस्य मुख्यमन्त्री नेफ्यू-रियो उपमुख्यमन्त्री यानथुङ्गो-पैटनः च नवदेहल्यां गृहमन्त्रिणा अमितशाहेन सह मेलनम् अकुरुताम्। अस्मिन् मेलने राज्यस्य विकाससम्बन्धि-प्राथमिकताः अग्रेसर्तुं केन्द्रसर्वकारात् सहयोगस्य आग्रहः कृतः।मुख्यमन्त्री रियो-वर्यः श्रीशाहं मध्यस्थतां कृत्वा नागालैण्डस्य विकाससम्बद्धप्रयासेषु गतिं आनेतुं सहयोगं कर्तुम् अनुरोधम् अकरोत्। उपमुख्यमन्त्री पैटनः सामाजिकमाध्यमस्य सन्देशे अकथयत् यत् मेलने नागालैण्डसम्बद्धानां विविधानां विषयाणां, विकासप्राथमिकतानां तथा राज्यस्य जनानां कल्याणस्य हितानां च विषये विचारविमर्शः अभवत्। उभौ नेतारावपि नागालैण्डाय निरन्तरमार्गदर्शनाय सहयोगार्थं च गृहमन्त्रिणे कृतज्ञतां न्यवेदयताम्।
एतन्मध्ये, मुख्यमन्त्री रियो गृहमन्त्रिणे प्रेषिते पत्रे केन्द्रसर्वकारं प्रति नागालैण्डे प्रवृत्तस्य संरक्षिताञ्चल-अनुज्ञापत्रस्य (पीएपी) व्यवस्थायाः सद्यः समीक्षां कृत्वा तत् प्रत्याहर्तुम् अनुरोधं कृतवान्।



# देहली : मुख्यमन्त्रिणी रेखा गुप्ता बाल-अधिकार-संरक्षण-आयोगं बाल-भिक्षावृत्ति-मुक्त-अभियानस्य सुदृढीकरणार्थं निर्देशान् अददात्

देहल्याः मुख्यमन्त्रिणी रेखा गुप्ता देहली-बाल-अधिकार-संरक्षण-आयोगस्य उपवेशनस्य अध्यक्षताम् अकरोत्। उपवेशनकाले मुख्यमन्त्रिण्या आयोगः जनसहभागितया 'बाल-भिक्षावृत्ति-मुक्ता देहली' इति अभियानं सुदृढीकर्तुं निर्दिष्टः। सा अकथयत् यत् अस्मिन् अभियाने इच्छुकाः अशासकीय-सङ्घटनाः (एन.जी.ओ.), नागरिक-समाज-सङ्घटनाः तथा निवासि-कल्याण-सङ्घाः योजनीयाः, येन स्थानीयस्तरे बालकान् यावत् अभिगमनं वर्धयितुं शक्येत।
मुख्यमन्त्रिणी रेखा गुप्ता 'राष्ट्रिय-पोषण-मास' इत्यस्य अवसरे विद्यालयेषु मध्याह्नभोजनं निर्मान्तीनां पाकशालानाम् अङ्गनवाडी-केन्द्रेषु च बालकेभ्यः दीयमानस्य पोषकाहारस्य व्यवस्थायाः निरीक्षणं कर्तुं आयोगं प्रति निर्देशाः प्रदत्ताः। सा अवदत् यत् कस्मिंश्चिदपि स्तरे न्यूनतायाः सम्मुखे आगमने सति तस्य सद्यः सूचना दीयेत। उपवेशने अङ्गनवाडी-केन्द्राणां शिशु-गृहाणां (क्रेच्) च सुविधानां तत्र च बालकैः सह अङ्गनवाडी-कार्यकर्तृणां व्यवहारस्य समीक्षार्थम् 'इण्टर्न्' इति प्रशिक्षणार्थिनां माध्यमेन प्रतिवेदनं निर्मातुं विचारविमर्शः अपि अभवत्। मुख्यमन्त्रिणी सर्वकारीय-निगम-विद्यालयेषु छात्रेभ्यः वृत्ति-मार्गदर्शकानां (करियर्-मार्गदर्शकानां) व्यवस्थाम् अपि प्रोत्साहयितुं परामर्शम् अयच्छत्।



# शारीरिक-शिक्षा-शिक्षकाणां पृष्ठ-शेषपदानां (बैकलॉग) 'जॉब-ट्रेनी' माध्यमेन पूरणे प्रतिबन्धः, उच्चन्यायालयेन सर्वकारात् उत्तरं याचितम्




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-उच्चन्यायालयेन शारीरिक- शिक्षा- शिक्षकाणां २३० पृष्ठ-शेषपदानि (बैकलॉग) नूतन-'जॉब-ट्रेनी' योजनायाः अन्तर्गतं पूरयितुम् अन्तरिमस्थगनादेशः कृतः। याचिकाकर्तृणाम् आरोपः अस्ति यत् सर्वकारः एतानि पृष्ठ-शेषपदानि वर्तमानानां 'नियुक्तिः तथा पदोन्नति'-नियमानाम्, अनुसारेण नियमितरूपेण पञ्चाशत्-प्रतिशतं प्रत्यक्ष-भर्ती/अनुबन्ध- आधारेण, पञ्चाशत्प्रतिशतं च श्रेणी-क्रमेण/ बैचवाइज पूरयितुं स्थाने एकस्याः नूतनायाः 'जॉब-ट्रेनी' योजनायाः माध्यमेन पूरयितुं प्रयासं करोति, यत् सर्वथा विरुद्धं विधि-विरुद्धं च वर्तते।

न्यायमूर्तेः ज्योत्स्नारिवाल दुआ महोदयायाः एकलपीठेन प्रथमदृष्ट्या याचिकाकर्तृभ्यः प्रस्तुतं पक्षं न्यायसङ्गतं मत्वा आदेशः प्रदत्तः यत् आगामिश्रवणं यावत् सर्वकारः एतानि पृष्ठशेषपदानि 'जॉबट्रेनी' आधारेण न पूरयिष्यति। उच्चन्यायालयेन राज्यसर्वकाराय सम्बद्ध-प्रतिवादिभ्यश्च सूचनापत्रं निर्गम्य सप्ताह-द्वयाभ्यन्तरे उत्तरं प्रस्तौतुं निर्दिष्टम्।

**किम् अस्ति प्रकरणम्**

अस्य प्रकरणस्य अग्रिमा विचारणा ७ अक्तूबर दिनाङ्के भविष्यति। उच्चन्यायालयेन अयं निर्णयः शैलजाकिरण-महोदयायाः, अन्याभिः याचिकाभिः सह श्रवणं कुर्वता प्रसारितः। इदं प्रकरणम् आहत्य ८७० शारीरिक-शिक्षा-शिक्षकाणां पदानां पूरणेन सह सम्बद्धम् अस्ति, यानि पदानि दीर्घ-कालात् वैधानिक-विवादानां कारणात् लम्बितानि आसन्। याचिकाकर्तृभिः विज्ञापितं यत् पुरातन-विवादे समाप्ते सति अधुना सर्वकारः एतेषां पदानां पूरण-प्रक्रियां प्रारभते। एतेषु ८७० पदेषु २३० पदानि पृष्ठ-शेषसंवर्गस्य सन्ति। सर्वकारः एतानि पृष्ठ-शेषपदानि 'जॉब-ट्रेनी' आधारेण पूरयति, यत् भर्ती-पदोन्नति-नियमानां प्रतिकूलं वर्तते।




## महत्तम-चिन्तायाः निवारणम्- स्थायिनः भविष्यन्ति शिक्षाविभागस्य एते कर्मचारिणः; सर्वकारेण नियमितीकरणाय दत्ता स्वीकृतिः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशसर्वकारेण अल्पकालिक-जलवाहक/ सेवकरूपेण दैनिक- वेतन- भोगी-आधारेण सेवां कुर्वतां योग्यानां कर्मचारिणां कृते महती समाश्वासना उद्घोषिता। सर्वकारेण २०२६ तमस्य वर्षस्य कृते निर्धारितां सेवा-कालावधिं पूरितवतां योग्यानां जलवाहकानां सेवानां नियमितीकरणाय स्वीकृतिः प्रदत्ता। उच्च- शिक्षाविभागस्य सचिवात् उच्च-शिक्षा-निदेशकं प्रति प्रेषिते आदेशे स्पष्टीकृतं यत् योग्यानां कर्मचारिणां नियमितीकरणं विभागे उपलब्धानां चतुर्थ-श्रेण्याः (सेवक-तथा-रक्षक-रिक्तपदानां विरुद्धं विधास्यते।

### वरिष्ठतायाः आधारेण भविष्यति नियमितीकरणम्

नियमितीकरणस्य प्रक्रिया वरिष्ठताक्रमेण भविष्यति, एतदर्थं सर्वकारेण निर्धारितानां सर्वेषां नियमानां समयानां च परिपालनम् अनिवार्यं भविष्यति। सर्वकारेण इयं स्वीकृतिः कार्मिक-विभागस्य १ अप्रैल २०२६ दिनाङ्कस्य मार्गदर्शिकायाः अन्तर्गतं प्रदत्ता अस्ति। अनेन दीर्घकालात् दैनिक-वेतन-भोगीरूपेण कार्यरतानां योग्यानां कर्मचारिणां नियमित-सर्वकारीय-सेवायां प्रवेशाय मार्गः निष्कण्टकः जातः।

### यथासम्भवं वर्तमानस्थाने एव भविष्यति पदस्थापना

सर्वकारीय-आदेशे अयम् अपि महत्त्वपूर्णः निर्देशः दत्तः यत् योग्याः कर्मचारिणः साम्प्रतं यत्र सेवारताः सन्ति, यथासम्भवं तस्मिन्नेव स्थाने तेषां नियमितीकरणं क्रियेत। तथापि नियमितीकरणानन्तरं यदि कस्यापि कर्मचारिणः स्थानान्तरणं वा नूतनस्थाने पदस्थापना वा करणीया स्यात्, तर्हि एतदर्थं सक्षम-प्राधिकारिणः पूर्वस्वीकृतिः स्वीकरणीया भविष्यति। सर्वकारस्य अस्याः अनुमत्या शिक्षाविभागे सेवारतानां तेषां कर्मचारिणां महती सहायता भविष्यति, यैः निर्धारितावधौ सेवा-कालोत्तीर्णा कृता। अधुना निदेशालयस्तरे योग्यतायाः, ज्येष्ठतायाः, रिक्तपदानां च आधारेण अग्रिमा प्रक्रिया कार्यरूपे परिणंस्यते।



## एनएलयू-संस्थानस्य (NLU) आधारभूत- संरचना भविष्यति सुदृढा; सुरक्षार्थं छात्रावासे स्थापयिष्यन्ते कण्टकित-तन्त्रयः- मुख्यमंत्री

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-राष्ट्रीय- विधि- विश्वविद्यालयस्य (एनएलयू-शिमला) आधारभूतसंरचनां सुदृढीकर्तुं प्रदेशसर्वकारः अग्रे आगतः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः विश्वविद्यालयेन सम्बद्धान् विविधान् विषयान् समीक्ष्य प्रोक्तवान् यत् छात्रेभ्यः उत्तम-शैक्षणिकवातावरणं प्रदातुं सर्वकारः आवश्यकं सहयोगं विधास्यति। सहैव विश्वविद्यालयेनापि स्वसंसाधनानां सृजनदिशि प्रयासाः करणीयाः। मुख्यमन्त्रिणा छात्राभ्यः छात्रेभ्यश्च नूतनछात्रावासानां निर्माणाय सहयोगस्य आश्वासनं दत्तम्। तेन छात्राणां छात्रावासस्य सुरक्षार्थं परितः कण्टकिततन्त्रयः स्थापयितुं निर्देशाः दत्ताः। परिसरे न्यून-विद्युत्प्रवाहस्य समस्यायाः निवारणाय नूतनपरिणामकः स्थापयिष्यते, यत्रैव छात्रावासस्य उपरिष्टात् गच्छन्ती उच्च-विद्युत्वाहिनी अपि अन्यत्र स्थानान्तरिता भविष्यति।

**विद्युत्-तन्त्रयः भविष्यन्ति भूमिगताः:-**

सुक्खू-महोदयः छात्राणां कर्मचारिणां च सुरक्षां विचिन्त्य विश्वविद्यालय-परिसरे उपरि प्रसारितानां विद्युत्-तन्त्रीणां भूमिगतीकरणाय पर्याप्तां धनराशिं प्रदातुं विश्वासं प्रददात्। अस्मात् अतिरिच्य जल-शक्ति-विभागः मल-जल-शोधन-संयन्त्राय योग्यस्थलं चिह्नीकर्तुं तथा च पेय-जलसङ्कटस्य स्थायीसमाधानाय आवश्यकाः उपायाः कर्तुं निर्देशितः। एनएलयू-विश्वविद्यालयस्य कुलपतयः प्रो. प्रीति सक्सेनामहोदयाः विश्वविद्यालयस्य दीर्घ-लम्बितानां समस्यानां समाधानाय मुख्यमन्त्रिणः कृतज्ञतां ज्ञापितवती। अस्मिन् उपवेशने हिमाचलप्रदेश-उच्चन्यायालयस्य मुख्यन्यायाधीशः न्यायमूर्तिः गुरमीतसिंह- सन्धावालिया, महाधिवक्ता अनूपरतनः, मुख्यसचिवः के. के. पन्तः, प्रधानसचिवः देवेशकुमारः, शिक्षासचिवः राकेशकंवरः, गृहसचिवः अमरजीतसिंहः, अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्।

# राजकीयस्नातकोत्तरमहाविद्यालये कोटद्वारे
## संस्कृतमासमहोत्सवस्य अन्तर्जालीयसङ्गोष्ठी सम्पन्ना





**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला**
उत्तराखण्डसंस्कृतसंस्थानेन आयोजितस्य संस्कृतमासमहोत्सवस्य अन्तर्गतं पौड़ीजनपदे भारतीयज्ञानपरम्परायां वैदिकदार्निकं चिन्तनं इत्यस्मिन् विषये अन्तर्जालीयसङ्गोष्ठी उच्चतकनीकपद्धत्या राजकीय- स्नातकोत्तर-महाविद्यालये कोटद्वारे महता उत्साहेन सम्पन्नोभूत्। कार्यक्रमस्य शुभारम्भः मातृशारदायाः प्रतिमायाः पुरतः दीपप्रज्वलनेन पुष्पार्चनेन च अभवत्। अस्मिन् अवसरे महाविद्यालयस्य प्राचार्यः प्रो. डी. एस. नेगी, प्रो. निरञ्जना शर्मा, डॉ. अरविन्द अवस्थी, प्रो. प्रतापबिष्टः, डॉ. मनीषासिंहः, डॉ. ऐश्वर्या राणा तथा अन्ये गणमान्यजनाः उपस्थिताः आसन्। अनन्तरं दिव्यांश्या सरस्वतीवन्दना, नवीनबिष्टेन वैदिकमङ्गलाचरणं, मोनिकानौगेंद्वारा स्वागतगीतं च सुसम्पन्नम् कृतम्।अध्यक्षीयभाषणे प्राचार्यः प्रो. डी. एस. नेगी संस्कृतभाषायाः संरक्षणसंवर्धनाय वैदिकाध्यात्मिकचिन्तनस्य अनिवार्यतां प्रतिपादितवान्। प्रस्तावनावक्तव्ये उत्तराखण्डसंस्कृतसंस्थानस्य सचिवः प्रो. विनयकुमारविद्यालङ्कारः उपस्थितान् विद्वांसः सम्बोध्य संस्कृतप्रचारस्य महत्त्वम् अवदत्। शोधाधिकारी डॉ. हरीशगुरुराणी उपनिषदां ध्येयवाक्यानि उद्धृत्य वेदानां प्रति सर्वेषां ध्यानम् आकर्षितवान्।विशिष्टातिथिः डॉ. सीताजुयालः भागवतमहापुराणस्य प्रसङ्गान् आधारीकृत्य भारतीयज्ञानपरम्परायाः गौरवं निरूपितवती। सहप्रवक्ता डॉ. अरविन्दावस्थी दार्शनिकदृष्ट्या मौलिकदर्शनशास्त्रस्य गूढतत्त्वानि प्रभावपूर्णेन व्याख्यानेन प्रस्तुतवान्। मुख्यवक्ता डॉ. दिनेशचन्द्रपाण्डेयः वेदं वैदिकसंहिताः, ब्राह्मणग्रन्थाः, आरण्यकानि, उपनिषदः तथा षड्दर्शनानि समन्वय्य भारतीयज्ञानपरम्परायाः अखण्डस्वरूपं विस्तरेण प्रतिपादितवान्। संस्कृतविभागप्रभारी डॉ. मनीषासिंहः समस्तप्राध्यापकेभ्यः धन्यवादं ज्ञापयित्वा छात्रछात्राणां उत्साहवर्धनम् अकरोत्। जनपदसंयोजकः, कार्यक्रमसञ्चालकः डॉ. मनोरथप्रसादनौगें शान्तिपाठेन कार्यक्रमस्य समापनम् अकार्षीत्। कार्यक्रमे डॉ. आशारामबिजल्वाणः, डॉ. मीराकुमारी, डॉ. एम. पी. शर्मा, डॉ. सन्दीपकुमारः, डॉ. प्रमोदसिंहः, डॉ. जितेन्द्रसिंहः, डॉ. विनोदभण्डारी, डॉ. बिशनलालः, डॉ. राकेशशाहः, अरविन्ददूतपुड़ी इत्यादयः प्राध्यापकाः उपस्थिताः आसन्। सङ्गोष्ठ्याः सफलसम्पादने संस्कृतविभागस्य डॉ. मनीषासिंहः, डॉ. गीता, डॉ. मनोरथप्रसादनौगें, डॉ. प्रिय अग्रवालः, तकनीकीव्यवस्थायां डॉ. ऐश्वर्याराणा एवं डॉ. पवनभट्टः विशेषं योगदानम् अददुः।



# विकृतेः संस्कृतिं प्रति गमनस्य मार्गः संस्कृतम् : आचार्य चन्दन

**उत्तरप्रदेशसंस्करणम् शाहजहाँपुरम्।**
आर्यमहिला-स्नातकोत्तरमहाविद्यालये संस्कृत-दिवसमहोत्सवस्य उपलक्ष्ये संस्कृतविभागस्य तत्त्वावधाने विभागीयक्रियाकलापानां विविधप्रतियोगितानां च आयोजनं सम्पन्नम्। कार्यक्रमे वक्तारः संस्कृतस्य महत्त्वं प्रतिपादयन्तः अवदन् यत् "विकृतेः संस्कृतिं प्रति गमनस्य मार्गः एव संस्कृतम्"। कार्यक्रमस्य मुख्यातिथिः आचार्यः चन्दनकुमारआर्यः अवदत् यत् संस्कृतं केवलं देवभाषा न, अपितु आधुनिकसङ्गणकयुगेऽपि महत्त्वपूर्णा भाषा अस्ति। तेन शिक्षकानां छात्राणां च दैनिकजीवने संस्कृतस्य प्रयोगस्य संकल्पः कारितः। अवसरे छात्राभिः सूक्तिलेखनस्य संस्कृतभाषणस्य च प्रतियोगितासु उत्साहपूर्वकं सहभागिता कृता। संस्कृतभाषणप्रतियोगितायां तान्या त्रिवेदी, अंशिका त्रिवेदी, स्नेहलता, सौम्या पटेल, तान्या तिवारी, ऋचा कुशवाहा, सोनी पाल तथा कोमल इत्येताभ्यः छात्राभ्यः प्रशंसा प्राप्ता। निबन्धप्रतियोगितायां ऋचा कुशवाहा प्रथमं, तान्या तिवारी द्वितीयं तथा सोनी पाल तृतीयं स्थानम् प्राप्तवत्यः। छात्राभिः मधुराष्टकम् इत्यस्य मनोहरप्रस्तुतिरपि कृता। महाविद्यालयस्य प्राचार्या प्रो. सुरचना त्रिवेदी छात्राः सम्बोध्य संस्कृताध्ययनस्य महत्त्वं प्रतिपादितवती। कार्यक्रमस्य सञ्चालनं डॉ. सन्ध्या पाठकेन कृतम्।

# संस्कृतभाषया सामाजिक-समस्यानाम् उन्मूलनस्य मार्गं प्रशस्तीकर्तुं समाह्वानम्

**हिमसंस्कृतवार्ताः- देहरादूनम्।**
उत्तराखण्ड- संस्कृतसंस्थानम्, उत्तराखण्डसर्वकारः इत्यस्य तत्त्वावधाने आयोजितस्य संस्कृतमासमहोत्सवस्य अन्तर्गते शुक्रवासरे देहरादूनजनपदस्तरीयायाः अन्तर्जालीय- संस्कृतसङ्गोष्ठ्याः २०२६–२७ इत्यस्य आयोजनं गूगलमीट-माध्यमेन सम्पन्नम्। सङ्गोष्ठ्याः विषयः "संस्कृतेन सामाजिकसमस्यानाम् उन्मूलनम्" इति आसीत्।
सङ्गोष्ठ्याः अध्यक्षतां हिमालयीय- आयुर्वेदिक-चिकित्सा- महाविद्यालयस्य प्राचार्यः प्रो. गौरीशङ्कर इन्द्रौरिया अकरोत्। सः अवदत् यत् संस्कृतभाषां विना सामाजिकसमस्यानाम् उन्मूलनम् आयुर्वेदशास्त्रस्य च सम्यगध्ययनं सम्भवं नास्ति। संस्कृतभाषायां विश्वबन्धुत्वस्य भावना निहिता अस्ति तथा च अस्याः भावनायाः माध्यमेन समाजे व्याप्तानां विभिन्नानां वैचारिकविभागानां वादानां च उपरि विजयः प्राप्तुं शक्यते। संस्कृतभाषया नैतिकमूल्यानि,




सामाजिकसमरसता, कर्तव्यबोधः, पर्यावरणसंरक्षणं, नारीसम्मानः, मानवीयसंवेदनाः च जन-जनं प्रति प्रापयितुं शक्यन्ते इति।संस्थानस्य सचिवः डॉ. विनयकुमार-विद्यालङ्कारः संस्कृतसंस्थानस्य उद्देश्यानि उद्धृत्य "गृहे गृहे संस्कृतम्" इति लक्ष्यं सार्थकं कर्तुं युवसंततिम् अग्रे भूत्वा दायित्वग्रहणाय प्रेरितवान्। संस्कृतभाषायाः सामाजिकोपयोगितायाः विषये प्रकाशं क्षिपन् सः अवदत् यत् संस्कृतभाषा केवलं प्राचीनज्ञानविज्ञानस्य भाषा नास्ति, अपि तु वर्तमानसामाजिकानां परिस्थितीनां समाधानस्य प्रभावी माध्यममपि भवितुम् अर्हति। कार्यक्रमस्य मुख्यातिथिः प्रो. सुमनकुमार झाः, साहित्यविभागः, श्रीलालबहादुरशास्त्री- राष्ट्रीय- संस्कृत-विश्वविद्यालयः, ध्वन्यालोकस्य, नीतिशास्त्रस्य, महाभारतस्य विभिन्नानां पद्यानाम् उद्धरणं कुर्वन् अवदत् यत् सामाजिकसमरसता, समानता तथा सौहार्दस्य भावना संस्कृतसाहित्ये सम्यक् समाविष्टा अस्ति। समाजे विद्यमानानां विभिन्नानां समस्याणां स्थायिसमाधानाय संस्कृतसाहित्ये निहितानां जीवनमूल्यानाम् आदर्शानां च व्यवहारे आचरणस्य आवश्यकता अस्ति इति सः बलं दत्तवान्।
मुख्यवक्ता डॉ. प्रकाशचन्द्रपन्तः विभिन्नानां समाजशास्त्रज्ञाणां मतानां दृष्टान्तानां च उल्लेखं कुर्वन् सामाजिकसमस्यानां विविधस्तरान् परिभाषितवान्। सः अवदत् यत् एतासां समस्यानाम् उन्मूलनाय संस्कृतशास्त्रेषु वर्णितेभ्यः दृष्टान्तेभ्यः आदर्शेभ्यश्च मार्गदर्शनं प्राप्तुं शक्यते। संस्कृतवाङ्मये निहितान् मानवीय- नैतिक- सामाजिकमूल्यान् वर्तमानपरिस्थितिषु उपयोगीन् सः प्रतिपादितवान्। सारस्वतातिथिः डॉ. प्रकाशचन्द्र जॉङ्गी युवसंततौ नैतिकमूल्यानां प्रति जागरूकतायाः, जलवायुपरिवर्तनस्य, पर्यावरणस्य निरन्तरं विकृतस्वरूपस्य च उल्लेखं कुर्वन् संस्कृतसुभाषितानां

संस्कृतसाहित्ये निहितानां जीवनोपयोगिनां शिक्षाणां च आश्रयणस्य महत्त्वं प्रतिपादितवान्। अस्मिन् अवसरे विशिष्टातिथिषु शोधाधिकारी- राज्यसंयोजकः डॉ. हरीशगुरुरानी, वेदप्रकाशशर्मा (संस्कृतसंवादः), संस्कृतभारती- देहरादूनस्य जनपदाध्यक्षः डॉ. रामभूषण बिजल्वाणः, आचार्यः रोशनगौड़ः, नागेन्द्रदत्तव्याजः इत्यादयः अनेके विद्वांसः, शिक्षकाः संस्कृतप्रेमिणश्च उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं जनपदस्तरीयस्य आयोजनस्य च दायित्वं जनपदसंयोजकेन डॉ. नवीन जसोला इत्यनेन निर्व्यूढम्। तकनीकीनियन्त्रणं धन्यवादज्ञापनं च जनपदसहसंयोजकेन धीरजमैठाणिना कृतम्। सरस्वतीवन्दना अञ्जुमिश्रया प्रस्तुता। आभासिकमाध्यमेन आयोजितायाम् अस्यां सङ्गोष्ठ्यां विशालप्रसादभट्टः, डॉ. अङ्कितमनोडी, डॉ. राघवझा, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ इत्यस्य समन्वयकः डॉ. अनिलगौतमः तत्रत्यः शिक्षणगणाः, शोधच्छात्राः, संस्कृतप्रेमिणः, संस्थानस्य कर्मचारिणः तथा समाजस्य विभिन्नैः वर्गैः सम्बद्धाः जनाः उपस्थिताः आसन्



# उद्घाटितः हणोगी-आन्तभौमिकमार्गः

## (चण्डीगढ़- मनाली- चतुष्पथमार्गे आरब्धः रोमाञ्चकारी प्रवासः



**हिमसंस्कृतवार्ताः- मण्डी।** चण्डीगढ़-मनाली-चतुष्पथ-राजमार्गे हणोगी- स्थानात् डयोड-पर्यन्तं सुखदः प्रवासः प्रारब्धः। शुक्रवासरे हणोगीतः दवाडापर्यन्तं आन्तर्भौमिकमार्गस्य संस्कारकार्यं सम्पन्नं जातम्, येन सहैव सप्तशत-मीटर (७०० मीटर) परिमितः आन्तर्भौमिकमार्गः अपि यातायातार्थं मुक्तः कृतः। आन्तर्भौमिकमार्गः एकांशतः उद्घाटितः, यस्मिन् मार्गेण उभयतः वाहनानाम् आवागमनम् आरब्धम्। उल्लेखनीयं यत् चण्डीगढ़- मनाली- चतुष्पथ- परियोजनायां पण्डोह-तः औटपर्यन्तं विदीर्यमाणानां पर्वतानां पाषाणपतनस्य च सङ्कटात् त्राणाय टनलद्वयं निर्मितम् अस्ति। डयोडतः हणोगीपर्यन्तम् आन्तर्भौमिकमार्गः पूर्वमेव सज्जीकृतः आसीत्, किन्तु हणोगी-समीपे पर्वतानां निरन्तर-स्खलनकारणात् एतेषां आन्तर्भौमिक- मार्गाणाम् अन्तः यातायात-सञ्चालनं न सम्भवति स्म। साम्प्रतं संस्कारकार्ये पूर्णे सति आन्तर्भौमिकमार्गस्य सञ्चालनम् आरब्धम्। डयोडतः हणोगीपर्यन्तं निर्मितस्य आन्तर्भौमिकमार्गस्य पुनर्निर्माणाय राष्ट्रिय-राजमार्ग- प्राधिकरणेन पञ्चाशत्-कोटिरूप्यकाणाम् (५० कोटि) अतिरिक्तधनराशिः स्वीकृता आसीत्। शापूरजी- पल्लोनजी-चतुष्पथ- निर्माणसंस्थायाः दल-प्रमुखेण आदर्श पनहोत्रा-महोदयेन शुक्रवासरे विधिवत् पूजा-अर्चनं कृत्वा आन्तर्भौमिकमार्गः उद्घाटितः। तेन आन्तर्भौमिकमार्गः जनसेवायै समर्पयितुं केन्द्रीय-मार्ग- परिवहनमन्त्रिणः नितिनगडकरी-महोदयस्य कृतज्ञता ज्ञापिता, धन्यवादश्च प्रकटितः।



# पद्मश्री विजयशर्मा महोदयः कुलपतिना आचार्य ललितकुमार अवस्थी महोदयेन सह मेलनम् अकरोत्

# मण्डी सङ्ग्रहालयः

## पर्वतीयचित्रकलाकार्यशाला, मण्डी@500 इति विरासतयात्रायाः चोपरि विचारविमर्शः

हिमसंस्कृतवार्ताः- डॉ. राकेश शर्मा, मंडी सरदारपटेलविश्वविद्यालय मण्डी इत्यत्र हिमाचलप्रदेशस्य कलायाः संस्कृतेः इतिहासस्य विरासतस्य च संरक्षणं विषयीकृत्य पद्मश्री सम्मानेन अलङ्कृतः प्रसिद्धः कला- इतिहासकारः विजयशर्मामहोदयः कुलपतिसचिवालये कुलपतिना आचार्य- ललितकुमार- अवस्थी महोदयेन सह मेलनम् अकरोत्। कुलपतिः पद्मश्री विजयशर्मा महोदयाय हिमाचलीटोपिका स्मृतिचिह्नं च प्रदाय तस्य स्वागतम् अकरोत्।

अस्मिन् अवसरे मण्डीनगरस्य समृद्धाम् ऐतिहासिक- संस्कृति- विरासतं नूतनपीढ्या सह योजयितुं, ताञ्च राष्ट्रीय- अन्तरराष्ट्रीयस्तरेषु परिचयं प्रदातुं सम्बद्धानां विभिन्न महत्त्वपूर्ण विषयाणाम् उपरि विस्तारेण चर्चा अभवत्। मण्डीनगरे सङ्ग्रहालयस्य स्थापना मण्डीनगरस्य पर्वतीय- चित्रकलायाः उपरि कार्यशाला कलासंस्कृति- आधारितः डिप्लोमा पाठ्यक्रमः, मण्डी @500 मण्डीनगरस्य ऐतिहासिकी यात्रा इत्यस्य माध्यमेन मण्डीनगरस्य पञ्चशताब्दीनाम् ऐतिहासिकसंस्कृतिः विरासतस्य संरक्षणस्य उपरि विस्तारेण चर्चा अभवत्। अस्मिन् अवसरे इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मामहोदयः उपस्थितः आसीत्। कुलपतिः आचार्यः ललितकुमार अवस्थी महोदयः अवदत् यत् विश्वविद्यालयः मण्डीनगरस्य समृद्ध-ऐतिहासिकसंस्कृति विरासतस्य संरक्षणाय अकादमिक- अध्ययनाय च प्राथमिकतां यच्छति। मण्डी पञ्चशतम् इत्यस्य माध्यमेन मण्डीनगरस्य पञ्चशतवर्षाणां यात्रां पुस्तक- कॉफी- टेबलबुक-यांत्रिक- अभिलेखीकरणं, मौखिक-इतिहासमाध्यमेन संरक्षितुं प्रयासाः क्रियमाणाः सन्ति। पद्मश्री विजयशर्मामहोदयः मण्डी कलम-पर्वतीयचित्रकला, लोकपरम्पराणां मन्दिरस्थापत्यस्य, ऐतिहासिक- धरोहरस्य संरक्षणस्य आवश्यकतायाः उपरि बलम् अददात्। सः अवदत् यत् मण्डीनगरे प्रस्तावितसङ्ग्रहालयं शोध; शिक्षा- सांस्कृतिकपर्यटनस्य च महत्त्वपूर्ण केन्द्रं निर्मातुं शक्यते।

एतदनन्तरं पद्मश्रीः विजयशर्मामहोदयः इतिहासविभागेन आयोजिते विशेषातिथि व्याख्याने विकसित भारत द्विसहस्र सप्तचत्वारिंशत् तमे वर्षे युवानां भूमिका इति विषये विद्यार्थिनः सम्बोधितवान्। सः विद्यार्थिनः स्वस्य गुप्तां प्रतिभां परिज्ञाय तां सकारात्मकदिशि विकासयितुम् आह्वानम् अकरोत्। सः अवदत् यत् इतिहासः अस्मान् अस्माकं मूलैः सह योजयति, कला संस्कृतिः च समाजस्य रचनात्मकतायै संवेदनशीलतायै च अभिव्यक्तिं यच्छतः। सः युवानः परम्परायाः आधुनिक- तन्त्रज्ञानेन सह समन्वयम् कुर्वन्तः विकसित भारत द्विसहस्र सप्तचत्वारिंशत् तमस्य निर्माणे सक्रियं योगदानं दातुम् आह्वानम् अकरोत्। कार्यक्रमे इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मा सहायक- आचार्यः विकेशकुमारः, चित्रकारः राजेशशर्मा, पुरातत्त्ववेत्ता अनिलकुमारः इत्येतैः सह विद्यार्थिनः चोपस्थिताः आसन्।

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन विश्वविद्यालये
## ज्योतिषविभागेन "विशिष्टव्याख्यानम्" इति कार्यक्रमः सम्पन्नः



**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः।** नलबार्यां स्थित- कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन विश्वविद्यालयस्य ज्योतिषविभागेन अद्य "विशिष्टव्याख्यानम्" इति कार्यक्रमः आयोजितः। अस्य कार्यक्रमस्य अध्यक्षता विश्वविद्यालयस्य माननीयेन कुलपतिना प्रो. प्रह्लाद- रा. जोशीमहोदयेन कृता। मुख्यवक्तृरूपेण केन्द्रीय- संस्कृत- विश्वविद्यालयस्य जम्मूपरिसरतः डॉ. मृत्युञ्जयतिवारीमहोदयाः उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः ज्योतिषविभागस्य छात्रेण रितिक खनालेन प्रस्तुतेन वैदिकमङ्गलाचरणेन अभवत्। तदनन्तरं वेद-वेदाङ्ग-सङ्कायप्रमुखैः डॉ. सुधाकरमिश्रमहोदयैः आगतानाम् अतिथीनां विदुषां च स्वागतं कृतम्।स्वकीये अध्यक्षीये उद्बोधने कुलपतिवर्यैः प्रो. प्रह्लाद रा. जोशीमहोदयैः भारतीयज्ञानपरम्परायां ज्योतिषस्य महत्त्वं प्रतिपादितम्। तैः उक्तं यत् ज्योतिषं केवलं भविष्यकथनमात्रं नास्ति, अपि तु भारतीयज्ञानविज्ञानस्य एका महती प्राचीना च शाखा वर्तते। तैः छात्राः ज्योतिषस्य शास्त्रीयस्वरूपेण सहैव तस्य वैज्ञानिक- तार्किक- पक्षं बोद्धुं शोधदृष्ट्या च अग्रे गन्तुं प्रेरिताः।

मुख्यवक्तृभिः डॉ. मृत्युञ्जयतिवारीमहोदयैः स्वव्याख्याने ज्योतिषस्य वैज्ञानिकतां गणितीय- आधारं खगोलीयपरम्परां च विस्तरेण प्रकाशितम्। तैः प्रतिपादितं यत् भारतीयज्योतिषपरम्परायां ग्रहनक्षत्राणां गतिः, कालगणना, गणितीय- सिद्धान्ताः पञ्चाङ्गनिर्माणञ्च सुव्यवस्थित-गणनासु आधृतानि सन्ति। ज्योतिषाध्ययने शास्त्रीयप्रमाणानि गणितपद्धतिः तार्किकदृष्टिकोणश्च आवश्यकाः इति कथयद्भिः तैः छात्रेभ्यः आह्वानं कृतम्। यत् छात्राः आधुनिक- शोधपद्धत्या सह भारतीयज्योतिषस्य वैज्ञानिक- पक्षस्य अध्ययनं कुर्युः। कार्यक्रमस्य सञ्चालनं डॉ. गणेशप्रसादमिश्रमहोदयैः कृतम्। तैः कार्यक्रमस्य सर्वेषां चरणानां कुशलतापूर्वकं निर्वहणं कृतम्। धन्यवादज्ञापनं ज्योतिष- विभागाध्यक्षैः डॉ. नन्दनकुमारतिवारीमहोदयैः सम्पादितम्। तैः सर्वेभ्यः अतिथिभ्यः शिक्षकेभ्यः छात्रेभ्यश्च कृतज्ञतां ज्ञापयद्भिः मानवजीवने ज्योतिषशास्त्रस्य उपयोगिता विवृता। अस्मिन् कार्यक्रमे मुख्यरूपेण न्यायविभागाध्यक्षाः डॉ. राजीवलोचनशर्माणः, ज्योतिषविभागस्य छात्राः विश्वविद्यालयस्य अन्ये सदस्याश्च उपस्थिताः आसन्। अनेन कार्यक्रमेन छात्राः ज्योतिषस्य शास्त्रीय- वैज्ञानिक- अनुसन्धानपरक- स्वरूपं ज्ञातुं महत्त्वपूर्णम् अवसरं प्राप्तवन्तः।

# विनोबा- भावे- विश्वविद्यालयस्य संस्कृतविभागस्य
## पञ्चदिवसीयव्याख्यानमालायाः चतुर्थं दिनमार्ष कन्या गुरुकुले सुसम्पन्नम्।

**हिमसंस्कृतवार्ताः- प्रज्ञा द्विवेदी, झारखण्डः।**

शुक्रवासरे पञ्चदिवसीय- व्याख्यानमालायाः चतुर्थदिवसस्य व्याख्यानम् आर्षकन्यागुरुकुले सम्पन्नम् अभवत्। कार्यक्रमस्य प्रारम्भे आर्षकन्यागुरुकुलस्य छात्राभिः स्वपरम्परागत- स्वागतगीतेन अतिथीनां स्वागतं कृतम्। ततः गुरुकुलस्य निदेशकेन आचार्यकौटिल्येन अतिथीनां हार्दिकं स्वागतं कृतम्। तदनन्तरं व्याख्यानमालायाः मुख्यवक्ता परमविद्वान् डॉ. घनश्यामचन्द्र- उपाध्यायस्य प्रथमं व्याख्यानम् पूर्वाह्णे ११.०० वादने प्रारब्धम्। व्याख्यानस्य विषयः आसीत्- “आदिवासिनाम् उच्चशिक्षायां भाषासञ्चारसमस्याः तासां समाधानञ्च।”

परमविद्वान् डॉ. उपाध्यायः स्वव्याख्याने आदिवासिशब्दस्य अर्थं स्पष्टयन् अवदत् यत् आदिवासी इत्यस्य तात्पर्यम् अस्ति- मूलनिवासी। आदिवासीसमाजस्य योगदानं विना अद्यतनः सभ्यसमाजः अपि निर्मितः न स्यात्। यदि आदिवासिनः स्वपरम्परागतानि मूलगीतानि न गायन्ति, मेलापकानाम् आयोजनं च न कुर्वन्ति, तर्हि आधुनिकगीतानां, बृहन्मेलानां परम्परा अपि न विकसिताभविष्यत्। तेन आदिवासिसमाजस्य उच्चशिक्षायां सहभागितायाः आवश्यकता प्रतिपादिता। उच्चशिक्षया सह तेषां संयोजनाय भाषासञ्चारः अत्यावश्यकः इति सः अवदत्। अस्माभिः उभयभाषासु विद्यमानानां समानार्थक- शब्दानां सङ्कलनं करणीयम् तथा



आदिवासिभाषाणां शब्दाः शब्दकोशेषु समावेशनीयाः इति तेन प्रतिपादितम्। व्याख्यानेन ऐतिहासिकशिक्षायाः, विज्ञानशिक्षायाः, राजनीतिशिक्षायाः च विविधाः पक्षाः प्रकाशिताः। आदिवासिनः औद्योगिकशिक्षया अपि सम्बद्धाः करणीयाः इति तेन विशेषतया प्रतिपादितम्। विषयस्य उपस्थापनं कुर्वन् डॉ. उपाध्यायः अवदत् यत् भाषाशब्दानाम् आदानप्रदानं भवेत्। आदिवासिसमाजस्य भाषायाः शब्दाः अस्माभिः स्वीकरणीयाः तथा अस्माकं भाषायाः शब्दाः अपि

तेषां मध्ये प्रसारणीया इति। एवं भाषासञ्चारः सुदृढः भविष्यति, आदिवासिनाम् उच्चशिक्षायां अधिकाधिकः प्रवेशः सम्भविष्यति। सः आदिवासिसमाजम् अपि स्वकीयस्तरे प्रयासं कर्तुं, भाविपीढीम् आधुनिकसमाजेन सह संयोजयितुं, स्वसमाजस्य परम्पराणाम् आधुनिकसमाजस्य परम्पराभिश्च तुलनां कर्तुं तथा नवपीढीं विज्ञानक्षेत्रे प्रवर्तयितुं च आह्वयत्। आदिवासिसमाजस्य शैक्षिकविकासाय सर्वकारेण अपि आवश्यकाः प्रयासाः करणीयाः इति तेन प्रतिपादितम्। तदनन्तरं द्वितीयं व्याख्यानं मध्याह्ने १२.३० वादने प्रारब्धम्। अस्य व्याख्यानस्य विषयः आसीत्- “पाण्डुलिपि- आधारितं शोधकार्यम्।” डॉ. उपाध्यायेन पाण्डुलिपीनां विविधपक्षाः विस्तरेण प्रतिपादिताः। भारतस्य विभिन्नेषु पुस्तकालयेषु संरक्षितानां पाण्डुलिपीनां विषये अपि तेन महत्त्वपूर्णा सूचना प्रदत्ता। उपस्थितान् विद्यार्थिनः सम्बोधयन् तेन पाण्डुलिपि-आधारितं शोधकार्यं कर्तुं प्रेरिताः।अस्मिन् व्याख्याने संस्कृतविभागस्य प्राध्यापकः डॉ. नकुलपाण्डेयः, विभागाध्यक्षा डॉ. अञ्जुम् आरा, गुरुकुलस्य निदेशकः आचार्यकौटिल्यः तथा सर्वे विद्यार्थी उपस्थिताः आसन्। ज्ञातव्यं यत् श्वः पञ्चदिवसीयव्याख्यानमालायाः अन्तिमः दिवसः भविष्यति। श्वः आयोजिते उभयोः व्याख्यानयोः विषयाः पुराणसम्बद्धाः भविष्यन्ति।

# विद्वान् प्रशस्यते लोके विद्वान् गच्छति गौरवम्।

**विद्या लभते सर्वं विद्या सर्वत्र पूज्यते॥**

भावार्थः— विद्या मनुष्यस्य जीवनं सार्थकं करोति। विद्वान् सर्वत्र सम्मानं प्राप्नोति तथा विद्या सर्वत्र पूज्यते। तात्पर्यम्— अस्य श्लोकस्य माध्यमेन विद्यायाः महत्त्वं प्रतिपादितम् अस्ति। अस्मिन् संसारे धनं, पदं, प्रतिष्ठा च नित्यं न भवन्ति, किन्तु विद्यया प्राप्तं ज्ञानं मनुष्यस्य जीवनपर्यन्तं तस्य सहायकं भवति। राजा स्वराज्ये सम्मानं प्राप्नोति, परन्तु विद्वान् स्वज्ञानस्य प्रभावेन देशे-विदेशे सर्वत्र सम्मानितः भवति। विद्या मनुष्यस्य केवलं बौद्धिकविकासं न करोति, अपितु तस्य विचारशक्तिं, विवेकं, आत्मविश्वासं तथा व्यक्तित्वं च विकसितं करोति। विद्यावान् मनुष्यः उचितानुचितयोः भेदं ज्ञातुं समर्थः भवति। सः कठिनपरिस्थितिषु अपि धैर्येण निर्णयं कर्तुं शक्नोति। अतः विद्यां केवलं जीविकोपार्जनस्य साधनरूपेण न स्वीकरणीयम्, अपितु जीवनस्य सम्यग्दर्शनस्य माध्यमरूपेण अपि अवगन्तव्यम्। यत्र ज्ञानस्य सम्मानः भवति, तत्र समाजस्य प्रगतिः अपि सुनिश्चितं भवति। अतः प्रत्येकः मनुष्यः विद्यां प्रति आदरभावं धारयेत् तथा निरन्तरं ज्ञानार्जने प्रयत्नं कुर्यात्।

**— अनुराग शुक्लः प्रयागराज**

# वार्ता-संवादः

**ईदरधीरजः**

**नन्दिनी:** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या:** नमस्ते नन्दिनि। ओडिशाराज्यस्य अरण्ये पञ्च वनमानुष-शिशवः प्राप्ताः। अधिकारिभिः ते दृष्टाः।
**नन्दिनी:** अहो आश्चर्यम्! ते शिशवः रक्षिताः इति समीचीनं जातम्। राजस्थानराज्ये एका अन्या विचित्रा घटना दृष्टा। सङ्केताभावकारणेन एकेन नरेण सञ्चार-स्तम्भः आरूढः। तेन विरोधः कृतः।
**काव्या:** महान् खेदः यत् दूरभाष-सङ्केतः न प्राप्तः! परन्तु ग्वालियर्-नगरे मन्दिरे देवाय विचित्राणि पत्राणि लिखितानि। परीक्षासाफल्याय एकेन छात्रेण मोदकानां प्रलोभनं दत्तम्।
**नन्दिनी:** हा हा! देवेन सह अपि व्यापारः कृतः! जयपुरनगरे अपि एका हास्यास्पदा घटना दृष्टा। एकया महिलया अन्तर्जाल-चलचित्राय राजमार्गः अवरुद्धः। तस्याः पृष्ठतः रुग्णवाहिका अपि अवरुद्धा।
**काव्या:** अहो मूर्खता! सा महिला जनैः भर्त्सिता। अद्यतनाः वार्ताः अतीव विचित्राः। धन्यवादः




# "संस्कृत कथा मञ्जरी {१७}

**।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।**

**"रक्षोभीतिवारणं नाम एकादशोपाख्यानम्" (१)**

अथ भोजे समाचङ्क्रम्यमाणे सिंहासनं पुत्तलिकाऽन्या कथयति- भो राजन्! श्रूयतां- विक्रमे राज्यं कुर्वति, भूमण्डले पिशुनः तस्करच पापकर्म्मनिरतो नासीत्। अन्यच्च- यस्य राज्ञः सदा राज्यभारचिन्ता बलवहैरिविजय चिन्ता च अस्ति स रात्रौ निद्रामपि नाधिगच्छति। अयं विक्रमादित्यो राजा तथाविधो न भवति। सर्वान् अर्थिभूभुजः स्वपादपद्माश्रितान् विधाय आज्ञाप्रदानेन राज्यं करोति। एकदा स राज्यभारं मन्त्रिषु निधाय स्वयं योगिवेशेन देशान्तरं निर्गतः।

यत्राऽऽत्मनचित्तस्य सुखं भवति, तत्र कतिचिद्दिनानि तिष्ठति यत्राश्चर्यं पश्यति तत्रापि कालं नयति। एवं पर्य्यटन् स एकस्मिन् दिवसे यदा महाऽरण्यमध्ये प्राविशत्, तदा सूर्योऽस्तं गतः। तदृष्टा राजा वृक्षमूलमेकमाश्रित्य रात्रौ स्थितः। तस्य वृक्षस्योपरि वृद्धः चिरञ्जीविनामा कश्चित् पक्षिराज आसीत्। तस्य पुत्राः पौत्राश्च देशान्तरं गत्वा स्वोदरपूरणं विधाय, सायंकाले प्रत्येकमेकैकं फलमादाय वृद्धाय तस्मै चिरञ्जीविने प्रतिदिनं प्रयच्छन्ति। तथा च-

**"वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः।**
**"अकार्य्यशतं कृत्वा भर्तव्या मनुरब्रवीत्।।"**

ततो रात्रौ चिरञ्जीवी सुखेनोपविष्टस्तान् पक्षिणः अपृच्छत्- राजाऽपि वृक्षमूले स्थितस्तद्वचः श्रृणोति- भो पुत्राः! युष्माभिर्नानादेशान् पर्य्यटद्भिः किं चित्रं दृष्टम्? तत्रैकेन पक्षिणा भणितं- मया किमप्याश्चर्यं न दृष्टम्; परम् अद्य मम चेतसि महादुःखं भवति। चिरञ्जीविनोक्तं-- तत् कथम किं निमित्तं दुःखम्। तेनोक्तं- केवलं कथनेन किं भवति? वृद्धेनोक्तं- भो पुत्र! यो दुःखी, स सुहृदि दुःख निवेद्य सुखी भवति। तस्य वाक्यं श्रुत्वा स दुःखकारणं कथयति- भो तात! श्रूयताम्- अस्ति उत्तरदेशे शेवालघोषो नाम पर्वतः। तत् पर्वतसमीपे पलाशनगरमस्ति, तस्मिन् पर्वते स्थितः कश्चित् राक्षसः प्रतिदिनं नगरमागत्य सम्मुखागतं यं कञ्चन मानुषं स्त्रियं बालकादिकं वा पर्वते नीत्वा भक्षयति। एकदा स नगरवासिभिः जनैः उक्तः- भो बकासुर! त्वं यथेच्छं सम्मुखपतितं यं कमेवं मा भक्षय, वयं तुभ्यं प्रतिदिनमाहारार्थम् एकं मानवं दास्यामः। तद्वचः तेनाङ्गीकृतम्। तदनन्तरं तत्रत्यो जनः प्रतिदिनं गृहक्रमेणैकैकं मानुषं तस्मै प्रयच्छति एवं महान् कालो गतः। अद्य पूर्वजन्मनि सञ्जातसौहार्दस्य मम मित्रस्य कस्यचित् ब्राह्मणस्य वारः समायातः; तस्यैक एव पुत्रः। पुत्रं ददाति चेत् सन्ततिच्छेदो भविष्यति; आत्मानं प्रयच्छति चेत्; भार्य्या विधवा भविष्यति; वैधव्यं पुनर्महादुःखम्। पत्नीं दास्यति चेत् आश्रमभ्रंशो भवति। तेषां दुःखेनाहं महादुःखो। इति मम महद् दुःखकारणम्। तस्य तद्वचनं श्रुत्वा तत्रत्यैः पक्षिभिर्भणितम्- अहो! अयमेव सुहृत्, यः सुहृदोदुःखेन स्वयं दुःखी भवति। एतदेव मित्रत्वम्। इति पक्षिणो वचः श्रुत्वा विहङ्गरवार्थविद् राजा तत्र नगरे वध्यशिला समीपे गतः। तत्र ब्राह्मणं निरीक्ष्य, अभयं दत्त्वा, स्वगृहं सम्प्रेष्य च, तत्समीपस्थे सरोवरे स्नात्वा वध्यशिलायामुपविष्टः।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**

# कौशिकी अमावस्या

अस्माकं सनातनसंस्कृतौ प्रतिवर्षं नैकानि पर्वाणि आचर्यन्ते। तानि धर्मयुतानि। पर्वाचारणकारणतः जनमध्ये एकतायाः, सम्प्रीतेः च योगसूत्रं सुदृढं भवतीति नात्र सन्देहः। भाद्रमासस्य अमावस्या तिथिः 'कौशिकी अमावस्या' इति नाम्ना ज्ञायते। अस्मिन् दिवसे आवर्षम् आचरितस्य धार्मिककृत्यार्थं तथा श्राद्धादिकार्यार्थं कुशोत्पाटनं क्रियते। इयं तिथिः पूर्वाह्नव्यापिनी गृह्यते। हिन्दुसनातनधर्मिणां कृते कस्यापि धार्मिकक्रियाकलापार्थं कुशस्य अनिवार्यता भवति।

शब्दकल्पद्रुमे प्राप्यते-

**'पूजाकाले सर्वदैव कुशहस्तो भवेच्छुचिः।**
**कुशेन रहिता पूजा विफला कथिता मया।।'**

इति। अतः प्रत्येकं गृहस्थेन अस्मिन् दिवसे कुशसञ्चयः कर्तव्यः। कुशाः दशविधाः मन्यन्ते-

**"कुशाः काशाः यवा दूर्वा उशीराश्च सकुन्दकाः।**
**गोधूमा ब्राह्मयो मौञ्जा दश दर्भाः सवल्वजाः।।"**

इति।

कुशोत्पाटनमन्त्रः- पूर्वमूखः अथवा उत्तराभिमुखो भूत्वा उपविश्य च 'हुं फट्' इत्युच्चार्य, तथा

**'विरञ्चिना सहोत्पन्न परमेष्ठिन्निसर्गज।**
**नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव।।'**

इति मन्त्रमेतं पठित्वा गृहस्थो ब्राह्मणो वा कुशान् उत्पाटयेत् इति विधानम्। भारतीयहिन्दूपर्व किञ्चन सामान्यं भवतु अथवा विशिष्टं भवतु, तत्सर्वं कल्याणकरं हि भवति। प्रत्येकं पर्वणि एकैकं निगूढं रहस्यं पूरितमस्ति। तस्मात् सर्वाणि पर्वाणि सनातनिभिः अस्माभिः सप्रेम, सविधि च पालनीयानि इति, शुभम्।


